International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 34-38
© 2020 IJSR
www.anantaajournal.com
Received: 16-07-2020
Accepted: 21-08-2020

**Prince Chakraborty**
Research Scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Prince Chakraborty**
Research Scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

# आनन्दबोधनये ख्यातिविचारः

**Prince Chakraborty**

## प्रस्तावना-

आनन्दबोधः शाङ्करवेदान्तस्य अनुयायिनः। एतेषां कालः 11वी.-12वी. वा शताब्दिः इति विद्वद्भिः अनुमन्यते। शाङ्करवेदान्तमाधरीकृत्य एतेषां ग्रन्थत्रयं समुपलभ्यते, ते यथा- क)न्यायदीपावली, ख)न्यायमकरन्दः, ग)प्रमाणमाला चेति। न्यायमकरन्दमाधारीकृत्य चित्सुखाचार्यः न्यायमकरन्दटीकां तथा सुखिशिष्यः सुखप्रकाशः न्यायमकरन्दविवेचनिव्याख्यामलिखत्। साङ्ख्यकारिकायाः अनेकात्मवादः अनेन खण्डितः। नैयायिकानां मीमांसानां बौद्धानाञ्च भ्रमसम्बन्धी-सिद्धान्तान् खण्डयन् अनेकात्मवादम् असमर्थयत्। एवमालोच्यते यत् आनन्दबोधस्य अविद्यासम्बन्धी-तर्कः मण्डनाचार्यात् स्वीकृतः। व्यासतीर्थमारभ्य सर्वे अर्वाचीनाः आनन्दबोधस्य युक्तिमेवानुसरन्ति। एवं परिलक्ष्यते यदयमाचार्यः स्वसमकालिकान् परवर्तिनश्च लेखकान् प्राचोदयत्।

## विषयप्रवेशः-

भारतीयदर्शनेषु ख्यातिवादस्य महत्वं दरिदृश्यते। ख्या-धातौ क्तिन्-प्रत्यये ख्यातिशब्दः निष्पद्यते प्रतीतिः इत्यर्थे। रज्जौ सर्पज्ञानं शुक्तौ रजतज्ञानं वा ख्यातिरुच्यते। प्रायः सर्वेषु दर्शनेषु अस्य वादस्य चिन्तनं वर्तते। शुक्तौ रजतभ्रमे किं कारणं? शुक्तिरजतयोः तात्त्विकस्थितिः का? अनयोः सत्यत्वमस्ति उत मिथ्यात्वम्? मिथ्यात्वमस्ति चेत् आंशिकमिथ्यात्वम् उत पूर्णमिथ्यात्वम्? इति एतान् प्रश्नानाधारीकृत्य ख्यातिवादः आरब्धः। एतेषां प्रश्नानामुत्तरं विभिन्नैः दार्शनिकैः भिन्नप्रकारेण दीयते। अतः वादाः अपि भिन्नाः सञ्जातः, यथा- प्राभाकरमीमांसकानामख्यातिः, नैयायिकानाम् अन्यथाख्यातिः, विज्ञानवादिबौद्धानामात्मख्यातिः, शून्यवादिबौद्धानामसत्ख्यातिः, अद्वैतिनाञ्च अनिर्वचनीयख्यातिः इति।

सामान्यरुपेण इदमुच्यते- "एकस्य वस्तुनः तद्भिन्यरूपेण प्रतीतिः" इति। रज्जौ दोषयुक्तनेत्रसन्निकर्षे सति दोषवशात् वल्मीक्यादौ स्थितस्य सर्पस्य प्रतीतिर्जायते। दूरे स्थितस्य वस्तुनः सम्मुखे ख्यातिः

अर्थात् दृष्टिगोचराभावे अपि निकटवर्तित्वरुपभिन्नधर्मेण प्रतीतिः इति अन्यथाख्यातिः। शङ्कराचार्यः स्पष्टयति "यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते।"[1]

असत्ख्यात्यनुयायिनः "ज्ञेयम् असत्, ज्ञातापि, ज्ञानमपि" इति प्रलपन्ति। भ्रमस्थले अधिष्ठानशुक्तिः असत्, तत्रारोपितरजतमपि। असतः सता ग्रहणं भ्रमः। एते व्याख्यान्ति असत्प्रकाशिका शक्तिः मायायां वरिवर्तते। अतः माया स्वं यथा प्रकाशयति तथा अन्यानि असद्वस्तुन्यपि इति अनादिकालात्। "स्वप्नावस्थायां यथा असत्पदार्थाः प्रकाशन्ते तद्वत् विज्ञानमपि असत्पदार्थान् प्रकाशयति।"[2] "अन्यत्र अन्यधर्माध्यासः"[3] इति। इत्यस्यार्थं कुर्वन्ति शून्यवादिनः असतः शुक्तौ असतः रजतस्य धर्माध्यासः इति।

आत्मख्यातिः आत्मज्ञानधर्मस्य बहिरारोपणम् आत्मख्यातिः। एतन्मतानुसारं मनुष्याणां संस्काराणुगुणं ज्ञानं चित्तं वा बाह्याकारेण प्रतीयते। ज्ञानाकारेण वस्तुना बाह्याकारः ध्रियते चेत् भ्रमः उत्पद्यते स एव आत्मख्यातिः। शुक्तौ रजतप्रतीतिस्थले रजतं बहिर्नागच्छति, किन्तु तिमिरादिदोषवशात् बहिः प्रतीतिर्जायते। एते चिन्तयन्ति बाधज्ञानद्वारा इदन्तधर्मः बाध्यते, किन्त्वान्तररूपेण रजतस्य सत्त्वमस्त्येव। शङ्कराचार्यः स्पष्टयति "केचिदन्यत्रान्यधर्माध्यास इति वदन्ति।"[4]

अख्यातिवादः एतन्मते "यथार्थं सर्वमेवेह विज्ञानम्"[5] इत्यतः भ्रमस्थले जायमानं ज्ञानमपि यथार्थम्। किन्तु द्वयोः भिन्नज्ञानयोः पार्थक्यं स्थापयितुं न शक्यते अतः भ्रमः। 'इदं रजतं' इति स्थले वर्तमानकालीनप्रत्यक्षज्ञानम् इदं, भूतकालीनस्मरणज्ञानं रजतञ्च अनयोरज्ञातभेदः भ्रमः। शङ्कराचार्यः स्पष्टयति "यत्र यदध्यासस्तद् विवेकाग्रहनिबन्धनो भ्रमः।"[6]

अनिर्वचनीयख्यातिवादिनः सत्तात्रयं स्वीकुर्वन्ति- पारमार्थिकव्यावहारिकप्रातिभासिकसत्त्वानि। इदं रजतं इति भ्रमे पारमार्थिकसत्ता नास्ति नापि व्यावहारिकी नापि प्रातिभासिकसत्ता च। अतः अयं भ्रमः अनिर्वचनीयः। रजतं न सत् शुक्तिज्ञाने प्राप्ते बाधात्, नापि अत्यन्त्यमसत् प्रतीतेः, नापि सदसद्विरोधी। अतः सद्विलक्षणा असद्विलक्षणा सदसद्विलक्षणा च अनिर्वचनीया ख्यातिः।

आचार्यानन्दबोधः पञ्चख्यातीः विस्तृतरूपेण व्याख्याञ्चकार। अत्यन्तप्रामाणिकरूपेण ख्यातिवादं प्रस्तौति। अत्र संशितिरेषा वर्तते आनन्दबोधाचार्यः केवलमनिर्वचनीयख्यातिं समर्थयति, अन्याः ख्यातयः खण्ड्यन्ते। किमर्थमित्यत्र विचारः।

**विचारः-**

मीमांसानुमतम् अख्यातिवादं प्रस्तुवन् आनन्दबोधः लक्षणं कथयति-"विवेकाग्रहमात्रं विज्ञानानां तज्ज्ञेयानां च विभ्रमः।"[7] ज्ञानज्ञेययोः विवेकाग्रहः भ्रमः इति। "पदार्थाः अन्योन्यभेदस्वभावाः अतः स्वयंप्रभतयोत्पन्नं प्रकाशद्वयं स्पष्टम्। एकं ज्ञानम्, अपरं तदधीनौ द्वौ अर्थौ। अनयोर्विवेकाग्रहस्वीकारः अनुचितः"[8] इति आनन्दबोधः। मीमांसकानां मतानुसारं विवेकाग्रहेण शुक्तौ रजतप्रवृत्तिः तथा रजतज्ञाने शुक्तिकायाः आलम्बनाभावः इति तर्कः खण्ड्यते। एवं रूपेण –असंसर्गो हि संसर्गाभावः। स च इदमिति रजतमिति च भासमानभावातिरेकी भवतां दुर्भणो भूभागमात्रातिरेकीव कुम्भाभावः, तथा च कथं प्रतिभासमानभावाभिन्नस्तदसंसर्गो न गृह्यते।[9] अपरं कथयति- भ्रमज्ञाने शुक्तित्वं न विषयः, किन्तु श्वेतभास्वरद्रव्यमात्रमेव। किन्तु एतन्न स्विक्रियते चेत् अनुभवविरोधात् मीमांसकानां मतं पराहतं भवति।[10]

---

[1] ब्रह्मसूत्रम्, शाङ्करभाष्यम्

[2] सर्वदर्शनसङ्ग्रहः, माधवाचार्यः

[3] भामतीव्याख्या, वाचस्पतिमिश्रः

[4] ब्रह्मसूत्रम्, शाङ्करभाष्यम्

[5] प्रकरणपञ्चिका 4/1

[6] प्रकरणपञ्जिका (नन्वेवं रजताभासः.........तादृक् परिस्फुरति)

[7] न्यायमकरन्दः पृ- 57

[8] न्यायमकरन्दः पृ- 65

[9] न्यायमकरन्दः पृ- 66

[10] न्यायमकरन्दः, भामती च

अन्यथाख्यातिवादविषये आम्नायते "नहि तस्य स्वरूपसतोऽपि तदात्मना सत्ता तात्विकी येनैतदित्थमनुभवगोचरतामापद्यते"[11] इति। इतोऽपि तेषां न्यायमकरन्दे –"रजताविवेकनिबन्धनायां पौरस्त्यवस्तुविषयायां प्रवृत्तौ प्रतिषिद्धायामऽवश्यमाश्रयणीये च रजतारोपे सत्यत्यन्तासतोऽर्थस्य प्रतिभासासम्भवाद् बाधविरोधाच्चात्यन्तिकसत्तानुपपत्तावश्यमाश्रयणीयमेतत् शुक्तिशकलमेव कामलादिदोषदूषितलोचनालोचितमर्थान्तरं रजतात्मनावभासत इति।"[12] "स खलु सन्निहितेदंकारास्पदतादात्म्यनिषेधादसन्निहिततामेवास्यार्थादापादयति न पुनरात्यन्तिकीमसत्ताम्।"[13] इति तत्रैव। आनन्दबोधः शुक्तौ रजतस्य अन्योन्यात्मकताभावं वस्त्वन्तरताभावं प्रदर्शयन् रजते आत्यन्तिकासत्ताभावः अनिर्वाच्यतास्वीकरणमात्रः इति कथयति इति एतत्तु अद्वैतिनां दृष्टिगोचरम्। अन्यथाख्यातिवादिभिः रजते अप्रतिभासत्वम् असत्व्यातित्वम् अनङ्गीक्रियते। तत्र आनन्दबोधः उवाच अन्यथाख्यातौ बाधबुद्धेः निरालम्बनतायाः प्रसक्तित्वात् इति। यथा-"यत्र हि तादात्म्यमात्रनिषेधस्तत्र वनस्पत्योरिव स्यादेवोत्तरक्षणेप्युभयावभासः न त्विह तथेति स्वरूपापबाध एवाध्यवसीयते"[14]

आत्मख्यातिः अत्यन्तप्रामाणिकतयोपस्थाप्यते आनन्दबोधेन। सः अस्य लक्षणमेवं स्पष्टयति- "केचित्तु ज्ञानाकारस्यैव बहिरवभासो विभ्रम इत्याहुः"। बौद्धाः अभिमन्यन्ते अत्यन्तासतः अप्रतिभासत्वमनुचितम्। अर्थात् अत्यन्तासतः प्रतिभासः नैव सम्भव्यते। गगनारविन्दवत्। अत्र खण्ड्यते यथा बाह्य-इदन्तस्य भानो भवति तादृक् भानः रजतस्यापि भवति। अतः रजतस्य आन्तराकारे स्वीकारे सति तस्याश्रयोऽपि स्वीकर्तव्यः। न्यायमकरन्दे – "यत्तावद् अत्यन्तासतः प्रतिभसायोगादिति, तदान्तराकरतायामपि रजतस्यावश्याश्रयणीयत्वाद् असत्याया एव बाह्यतायाः प्रतिभासस्यायुक्तम्।"[15] उदाहृयते- "यदि बुद्धौ तर्हि गुञ्जापुञ्जादौ ज्वलनादिसमारोपावसरे शरीरदाहादिप्रसङ्गः. तत्रापि तस्याऽतात्त्विकत्वान्न प्रसङ्ग इति चेत् आयातं तर्हि अत्यन्तासत्त्वमनिर्वाच्यं वा"[16] एवं रुपेणात्मख्यातिः निरास्यते।

असतख्यातिवादी अनुमन्यते आत्यन्तिकासत्पदार्थः विज्ञानेन प्रतीयते, विज्ञानस्य इयम् असत्प्रकाशनशक्तिः अविद्या इत्युच्यते। "अत्यन्तमसन्तमर्थं........तथाचास्याऽसत्प्रकाशनशक्तिरविद्येति गीयते"[17]- इति न्यायमकरन्दे। अस्य खण्डनप्रसङ्गे विकल्पद्वयं प्रस्तौति-असत् प्रकाशनशक्तेः कार्यमुत ज्ञाप्यम्। उभयमपि अनुपपन्नम्। असतख्यातिवादिनः असतः रजतस्य प्रतीतिः नैव स्वीक्रियते। एतत् खण्ड्यते- यथा अनाद्यविद्या-विलासस्यैव सोपाख्यतया ज्ञानाभिधानार्हस्याऽभाव प्रत्ययगोचरताभ्युपगमाद्। विज्ञानैः स्वीकृतः असत्प्रकाशः, सति असति सम्बन्धाभावश्च खण्ड्यते आनन्दबोधैः। नरविषाणदृष्टान्ते साध्यविकलता खण्ड्यते एवं रुपेण- "अनाद्यविद्याविनिर्मितालीकाकारविकल्पनिज्ञानोदय-मन्तरेणाखिलसामर्थ्यविरहिणोऽसतस्तत्र तत्र प्रकाशगोचरभावानिरूपणात्"[18] इति।

आनन्दबोधः अनिर्वचनीयवादं स्वीचकार। एतं लक्षयति – "एकैकप्रकारवैलक्षण्याऽवच्छिन्नोभयप्रकारवैलक्षण्यस्य लक्षणभावे न कञ्चन दोषं पश्यामः"[19] इति। सदसद्रूपेण अनिर्वचनीयवस्तुनः ज्ञानं कैश्चिदपि प्रमाणैः न सिद्ध्यति इति आक्षेपो खण्ड्यते- "अस्त्येव खल्वर्थापत्तिः, तथाहि नात्यन्तासतो नरविषाणस्य प्रतिभासगोचरता, नापि अत्यन्तसतश्चेदात्मनो बाधसम्भवः तदिहोभयान्यथानुपपत्त्योभयविलक्षणता रजतादेराश्रीयत इति"[20]।

सत्वस्य असत्वस्य च प्रयोजकतया ख्यातस्य बाधस्य च अनुपपत्तिं निवारयति-

[11] न्यायमकन्दः पृ- 84

[12] न्यायमकरन्दः पृ-82, प्रमाणमाला,

[13] न्यायमकरन्दः पृ-82

[14] न्यायमकरन्दः पृ-84

[15] न्यायमकन्दः पृ-100

[16] प्रमाणमाला, पृ-9, तुलना, तत्त्वप्रदीपिका पृ-120-121

[17] न्यायमकरन्दः पृ-102-103

[18] न्यायमकरन्दः पृ-108

[19] न्यायमकन्दः पृ-115

[20] न्यायमकरन्दः पृ-115

"असद्वैलक्षण्यस्याऽसदधीननिरूपणस्याबाधप्रयोजताभ्युपगमे भवति गौरवं न पुनः सन्मात्रस्य, तथा सद्वैलक्षणस्य सदधीननिरूपणस्याप्रतिभासप्रयोजकभावे"[21] इति।

सदसद्विलक्षणतायाम् अनुभवविरोधं निवारयति- "शुक्तिकेदन्तासंसर्गवत् तत्रासंसर्गस्याप्यनिर्वाच्यस्यैवावभासनाद् अन्यस्याश्च रजतसत्ताया अनुपलम्भान्न विरुद्ध प्राचीनोऽनुभवः"[22] इति।

पुर्वपक्षी पुनः आक्षिपति- भ्रमस्थले प्रातिभासिकसत्तायाः प्रतीतिर्भवति अतः लौकिके रजते अप्राप्ते सति तस्य बाधस्वीकारः अनुचितः इति। आक्षेपं निवारयति- "न च वाच्यं लौकिकस्यात्राप्रसक्तस्य प्रतिषेधो रजतस्य न युज्यत इति, रजताभासप्रसङ्गस्यैव तत्प्रतिषेधनिमित्तत्वात्"[23] इति।

आनन्दबोधः अपराद्वैतदार्शनिकप्रकाशात्मयतिमान्य-अनिर्वचनीयतायाः लक्षणे दोषरहितत्वं प्रतिपादयन् कथयति बाधितविषयः अनिर्वाच्यः- "अपरे पुनर्बाधगोचरभावमनिर्वाच्यलक्षणमाचक्षते न चैवमतिव्याप्तिः निर्वाच्यस्यात्मादेरबाधात्, नाप्यव्याप्तिरनिर्वाच्यरज्जुभुजङ्गादेर्बाध्यत्वनियमात्" [24] इति।

एवं रुपेण आनन्दबोधः अनिर्वचनीयख्यातेः स्वरुपलक्षणं समाहरति – न सत् नासत् नापि च सदसद् अपितु अनादिः अनिर्वाच्यम् अविद्याविलासम् मिथ्याज्ञानालम्बनञ्च। उच्यते – "तस्मान्नसन्नासन्नापिसदसदपित्वानाद्यनिर्वाच्याविद्याक्रीडनमलीकनिर्भासं विभ्रमालम्बनमिति सिद्धम्।"[25]

स्वसमर्थनाय आनन्दबोधेन वाचस्पतिमिश्रस्य अप्राप्तग्रन्थस्य ब्रह्मतत्त्वसमीक्षायाः पङ्क्तिः उदाहृयते- "अत एवोक्तमाचार्येण बाचस्पतिना ब्रह्मतत्त्वसमीक्षायां सदसदुभयानुभयादिप्रकारैरनिर्वचनीयत्वमेव ह्यविद्यानामविद्यात्वमिति"।[26] आनन्दबोधः अनिर्वचनीयरजतस्य उपादानकारणमविद्यां स्वीकरोति।

[21] न्यायमकरन्दः पृ-116

[22] न्यायमकरन्दः पृ-118

[23] न्यायमकरन्दः पृ-120

[24] न्यायमकरन्दः पृ-125

[25] न्यायमकरन्दः पृ-125

**उपसंहारः**

'ख्यातिः' इति प्रतीतौ भ्रमज्ञानार्थे वा प्रयुज्यते। भ्रमज्ञानविषये भारतीयानां वैमत्यं दरिदृश्यते। प्राभाकरमीमांसकाः भ्रमज्ञानम् अख्यातिवादेन प्रकटयति। पुनश्च अख्यातिवादं निवारणाय तर्कः प्रस्तुयते-

प्रतिज्ञा—तत्सिद्धमेतद् विवादाध्यासितं रजतविज्ञानं पुरोवर्तिवस्तुविषयम्।

हेतुः—रजतार्थिनस्तत्रनियमेन प्रवर्तकत्वाद्।

उदाहरणम्—उभयवादास्पदरजतविज्ञानवदिति।

न्यायदार्शनिकः भ्रमस्थले अन्यथाख्यातिं स्वीचकार। विज्ञानवादीबौद्धाः भ्रमस्थले आत्मख्यातिवादं प्रतिपादयन्ति। भ्रमस्थले असत्ख्यातिवादः माध्यमिकानाम्।

आनन्दबोधः सर्वान् ख्यातिवादान् प्रमाणपुरस्सरमखण्डयत्। अद्वैतीनां भ्रमस्थले अनिर्वचनीयख्यातिः प्रतिष्ठापयन्चकार। तेषां मते रजतं न सत् शुक्तिज्ञाने सति बाधः नाप्यसत् प्रतीतियोग्यत्वात्। नापि सदसत् उभयोः विरोधित्वात्। एतद्विलक्षणत्वात् अनिर्वचनीयः। न तु निर्वचनयोग्याभावः।

अत्र यथामतिः आनन्दबोधानुसारमनिर्वचनीयख्यातेः स्थापनं तद्भिन्नानां च खण्डनं प्रस्तावितमिति शम्।

**सहायकग्रन्थसूची**

1. न्यायमकरन्दः, श्रीमदानन्दबोधभट्टारकाचार्यसङ्गहीतः आचार्यचित्सुखमुनिविरचितव्याख्योपेतः, चौखाम्बा संस्कृत सिरीज् 1907
2. ब्रह्मतत्त्वसमीक्षा, बाचस्पतिमिश्रः

[26] ब्रह्मतत्त्वसमीक्षा

3. वेदान्त दर्शन, श्रीराम शर्मा आचार्य, युग निर्माण योजना गायत्री 2010
4. तत्त्वप्रदीपिका (चित्सुखी), परमहंस-प्रत्यग्रूप-भगवत्प्रणीत नयनप्रसादिनी संस्कृत व्याख्या, चौखाम्बा विद्याभवन, वाराणसी
5. भामती, निखिलतन्त्रस्वतन्त्रश्रीवाचस्पतिमिश्रविरचिता, वनारसप्रिंटिङ्गप्रेसनामकयन्त्रालये छन्नूलालेन मुद्रिता, संवत्सरे 1936 ख्रीष्ट शके 1880
6. ब्रह्मसूत्र शाङ्करभाष्य (चतुःसूत्री), रमाकान्त त्रिपाठी, उत्तर प्रदेश हिन्दी संस्थान, लखनऊ 2009
7. श्रीमन्माधवाचार्यविरचितः सर्वदर्शनसंग्रहः, गोविन्द सूरिविरचित भाष्यटीकासहितः, कल्याण-मुम्बइ
8. प्रकरणपञ्चिका, प्रभाकरमतानुसारि- मीमांसादर्शनम्, श्रीशालिकानाथमिश्रविरचितम्। चौखाम्बा संस्कृत सिरीज् 1903